ॐ

Śrī Sāī Rām

# ॥ श्रीरुद्रप्रश्नः ॥

## śrīrudrapraśnaḥ

### *Anuvakam 5*

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 1 | नमो॑ भ॒वाय॑ च रु॒द्राय॑ च<br>namo bhavāya ca rudrāya ca | नमो॑ भ॒वाय॑ च रु॒द्राय॑ च<br>namo bhavāya ca rudrāya ca |
| 2 | नमः॑ श॒र्वाय॑ च पशु॒पत॑ये च<br>namaḥ śarvāya ca paśupataye ca | नमः॑ श॒र्वाय॑ च पशु॒पत॑ये च<br>namaḥ śarvāya ca paśupataye ca |
| 3 | नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च<br>namo nīlagrīvāya ca śitikaṇṭhāya ca | नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च<br>namo nīlagrīvāya ca śitikaṇṭhāya ca |
| 4 | नमः॑ कप॒र्दिने॑ च॒ व्यु॑प्तकेशाय च<br>namaḥ kapardine ca vyuptakeśāya ca | नमः॑ कप॒र्दिने॑ च॒ व्यु॑प्तकेशाय च<br>namaḥ kapardine ca vyuptakeśāya ca |
| 5 | नमः॑ सहस्रा॒क्षाय॑ च श॒तध॑न्वने च<br>namaḥ sahasrākṣāya ca śatadhanvane ca | नमः॑ सहस्रा॒क्षाय॑ च श॒तध॑न्वने च<br>namaḥ sahasrākṣāya ca śatadhanvane ca |
| 6 | नमो॑ गिरि॒शाय॑ च शिपिवि॒ष्टाय॑ च<br>namo giriśāya ca śipiviṣṭāya ca | नमो॑ गिरि॒शाय॑ च शिपिवि॒ष्टाय॑ च<br>namo giriśāya ca śipiviṣṭāya ca |
| 7 | नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च<br>namo mīḍhuṣṭamāya ceṣumate ca | नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च<br>namo mīḍhuṣṭamāya ceṣumate ca |
| 8 | नमो᳚ ह्र॒स्वाय॑ च वाम॒नाय॑ च<br>namo hrasvāya ca vāmanāya ca | नमो᳚ ह्र॒स्वाय॑ च वाम॒नाय॑ च<br>namo hrasvāya ca vāmanāya ca |

*[1] To follow the learning column, where each śloka is divided into many parts and each part is chanted twice, please refer to Sri-Rudram-Learning-Method-1-Anuvakam-5.mp3.*

*[2] To follow continuous chanting column, where the śloka is chanted without interruption and repeated once, please refer to Sri-Rudram-Learning-Method-2-Anuvakam-5.mp3 or Sri-Rudram-Learning-Method-3-Anuvakam-5.mp3 where no repetition accrues.*

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 9 | नमो॑ बृह॒ते च॒ वर्षी॑यसे च॒<br>namo̍ bṛha̱te ca̱ varṣī̍yase ca̱ | नमो॑ बृह॒ते च॒ वर्षी॑यसे च॒<br>namo̍ bṛha̱te ca̱ varṣī̍yase ca̱ |
| 10 | नमो॑ वृ॒द्धाय॑ च सं॒वृध्व॑ने च॒<br>namo̍ vṛ̱ddhāya̍ ca saṃ̱vṛdhva̍ne ca̱ | नमो॑ वृ॒द्धाय॑ च सं॒वृध्व॑ने च॒<br>namo̍ vṛ̱ddhāya̍ ca saṃ̱vṛdhva̍ne ca̱ |
| 11 | नमो॒ अग्रि॑याय च प्रथ॒माय॑ च॒<br>namo̱ agri̍yāya ca pratha̱māya̍ ca̱ | नमो॒ अग्रि॑याय च प्रथ॒माय॑ च॒<br>namo̱ agri̍yāya ca pratha̱māya̍ ca̱ |
| 12 | नम॑ आ॒शवे॑ चाजि॒राय॑ च॒<br>nama̍ ā̱śave̍ cāji̱rāya̍ ca̱ | नम॑ आ॒शवे॑ चाजि॒राय॑ च॒<br>nama̍ ā̱śave̍ cāji̱rāya̍ ca̱ |
| 13 | नमः॒ शीघ्रि॑याय च॒ शीभ्या॑य च॒<br>nama̱ḥ śīghri̍yāya ca̱ śībhyā̍ya ca̱ | नमः॒ शीघ्रि॑याय च॒ शीभ्या॑य च॒<br>nama̱ḥ śīghri̍yāya ca̱ śībhyā̍ya ca̱ |
| 14 | नम॑ ऊ॒र्म्या॑य चावस्व॒न्या॑य च॒<br>nama̍ ū̱rmyā̍ya cāvasva̱nyā̍ya ca̱ | नम॑ ऊ॒र्म्या॑य चावस्व॒न्या॑य च॒<br>nama̍ ū̱rmyā̍ya cāvasva̱nyā̍ya ca̱ |
| 15 | नम॑ः स्रोत॒स्या॑य च॒ द्वीप्या॑य च<br>nama̍ḥ srota̱syā̍ya ca̱ dvīpyā̍ya ca | नम॑ः स्रोत॒स्या॑य च॒ द्वीप्या॑य च॥<br>nama̍ḥ srota̱syā̍ya ca̱ dvīpyā̍ya ca |